संस्कृत वार्ता:
दिनाङ्क : 27/11/2026
सायम् : 06:20

आदौ मुख्यवार्ता:

- केन्द्रीय-संसदीय-कार्यमन्त्री किरेन-रिजिजुः सोमवासरात् प्रारभ्यमाणे संसदः चतुर्दिनात्मके सत्रे सार्थक-चर्चायां संसद-सदस्यान् भागं ग्रहीतुं न्यवेदयत्।

- हिन्द-महासागरः वैश्विक-वाणिज्यस्य, ऊर्जा-सुरक्षायाः, आर्थिक-समृद्धेश्च केन्द्र-बिन्दुः अस्ति इति विदेश-मन्त्री डॉ. एस. जयशङ्करः विशेषतया प्रतिपादितवान्।

- वाणिज्योद्योग-मन्त्री पीयूष-गोयलः अद्य विज्ञापितवान् यत् भारत-अमेरिका-देशयोः मध्ये व्यापार-सन्धिः इदानीम् अन्तिम-रूपं प्राप्नोति।

- गोवा-राज्ये भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य अष्टमे दिवसे भारतीयानाम् अन्ताराष्ट्रियाणां च चलच्चित्राणां प्रदर्शनं करिष्यते। अथ च चलच्चित्र-निर्माणे नूतन-प्रवृत्तीनाम् प्रदर्शनमपि विधास्यते।

- क्राइस्टचर्च-नगरे प्रवर्तमानायां द्वितीयायां टेस्ट्-क्रिकेट्-स्पर्धायां प्रथम-दिवसस्य समाप्तिं यावत् न्यूजीलैण्ड्-दलेन भारतं विरुध्य पञ्च-क्रीडकानां हानौ षट्चत्वारिंशदधिक-द्विशतं धावनाङ्काः समर्जिताः।

अथ वार्ता: विस्तरेण

रिजिजू-संसद्सत्रम्

संसदीय-कार्यमन्त्री किरेन-रिजिजूः अवोचत् यत् सोमवासरात् प्रारभ्यमाणेषु लोकसभायाः चतुर्दिनात्मकेषु उपवेशनेषु सर्वकारः महत्त्वपूर्णानि विधायी-कार्याणि आनयिष्यति। संसदः उभयोः सदनयोः विशेष-उपवेशनात् प्राक् नवदिल्ल्यां संवाददातृभिः सह वार्तालापं कुर्वन् श्रीरिजिजूः अवदत् यत् एतानि विधेयकाणि दिसम्बर्-मासस्य द्वितीय-दिनाङ्कतः प्रारभ्यमाणेषु राज्यसभायाः उपवेशनेषु अपि अग्रे उपस्थापयिष्यन्ते। श्रीरिजिजूः सर्वेषां राजनैतिक-दलानां नेतॄन् प्रत्येकं संसद-सदस्यं च उपस्थापयिष्यमाणेषु विधेयकेषु पूर्ण-मनोयोगेन चर्चायां भागं ग्रहीतुम् अनुरोधम् अकरोत्। सः अवदत् यत् उभयोः सदनयोः कार्याचरणं सुचारु-रूपेण प्रचलेदिति सर्वेषां संसद-सदस्यानां दायित्वम् अस्ति।

जयशङ्कर-आयोरा

विदेश-मन्त्री डॉ.एस.जयशङ्करः अद्य प्रतिपादितवान् यत् हिन्द-महासागरः वैश्विक-वाणिज्यस्य, ऊर्जा-सुरक्षायाः, संयोजकतायाः , आर्थिक-समृद्धेश्च , केन्द्र-बिन्दुः अस्ति। नव-दिल्ल्यां हिन्द-महासागर-तटीय-सङ्घस्य मन्त्रि-परिषदः उपवेशने स्वकीये आरम्भिक-भाषणे डॉ. जयशङ्करः अवदत् यत् अयं प्रदेशः अपार-विविधतायाः ,अवसराणां , आह्वानानां च क्षेत्रमपि अस्ति। सः अवोचत् यत् अयं महासागर-प्रदेशः शान्तिपूर्णः, स्थिरः, सुरक्षितः, विकासस्य च अनुकूलः तिष्ठति इति सुनिश्चितकरणम् आयोरा-सङ्घस्य सामूहिकं दायित्वम् अस्ति। विदेशमन्त्री अवदत् यत् महत्त्वपूर्ण-वैश्विक-आह्वानानां समये आयोरा-सङ्घेन स्वकीयः सामूहिक-स्वरः सुदृढीकर्तव्यः अथ च एकस्य समावेशि-क्षेत्रीय-मञ्चस्य रूपेण स्वकीया भूमिका पुनः दृढीकर्तव्या।

गोयल-सन्धिः

वाणिज्योद्योग-मन्त्री पीयूष-गोयलः अद्य अवोचत् यत् भारत-अमेरिका-देशयोः मध्ये व्यापार-सन्धिः इदानीम् अन्तिम-रूपं प्राप्नोति । नव-दिल्ल्यां आयोजितम् इण्डिया-डैट्-कैपिटल्-मार्केट्-शिखरसम्मेलनम् आभासीयमाध्यमेन सम्बोधयन् श्रीगोयलः अवदत् यत् कतिपय-प्रक्रियाणां कारणात् अयं द्विपक्षीय-सन्धिः स्थगितः , परन्तु सम्प्रति स्वकीये अन्तिम-चरणे वर्तते। मन्त्री आशां प्रकटितवान् यत् भारत-यूरोपीय-सङ्घयोः मुक्त-व्यापार-सन्धिः अस्मिन् एव वर्षे निष्पादितः हस्ताक्षरितश्च भविष्यति अथ च आगामी-वर्षस्य मार्च-अप्रैल-मासयोः प्रभावी भविष्यति। श्रीगोयलः अवदत् यत् विगत-पञ्च-वर्षेषु भारतेन अष्टत्रिंशत् विकसित-देशान् आवृण्वन्तः नव मुक्त-व्यापार-सन्धयः अन्तिमरूपेण सम्पादिताः येन सप्तति-ट्रिलियन्-डॉलर्-परिमितस्य संयुक्त-सकल-आन्तरिक-उत्पादस्य अर्थव्यवस्थासु भारतस्य वरीयता-आधारित-विपणि-प्रवेशः सुनिश्चितः ।

श्रीगोयलः अवोचत् यत् वित्तीय-वर्षस्य प्रथमेषु सप्त-मासेषु निर्यात-व्यापारः प्रायः सप्तत्यधिक-पञ्चशत-बिलियन्-डॉलर्-स्तरं प्राप्तवान् , येन भारतं स्वकीयम् एक-ट्रिलियन्-डॉलर्-परिमितं वार्षिक-निर्यात-लक्ष्यं प्राप्तुं सम्यक् मार्गे अग्रे सरति।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।

प्रोमो - सोशल मीडिया

भारतीय-चलच्चित्रमहोत्सवः

सप्तपञ्चाशत्तमः भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः अद्य गोवा-राज्ये प्रख्यातैः चलच्चित्र-निर्मातृभिः , रोचकैः विचार-विमर्शैः भारतीय-अन्ताराष्ट्रिय-चलच्चित्राणां च वैविध्यपूर्ण-सङ्ग्रहेण सह स्वकीयस्य अष्टम-दिवसस्य साक्षी भवति। भारतीय-चलच्चित्र-जगतः ऐतिहासिक-क्षणानां पुनः स्मरणतः आरभ्य चलच्चित्र-निर्माणस्य नूतन-प्रवृत्तीनाम् अन्वेषणं यावत्, अयं महोत्सवः आदिनं आयोज्यमानैः प्रमुख-सत्रैः विशेष-प्रदर्शनैश्च सह दर्शकेभ्यः एकं रोचकम् अनुभवम् निरन्तरं प्रददाति। सत्रेषु विशेषज्ञैः इदम् अपि प्रतिपादितम् यत् यद्यपि कृत्रिम-बुद्धिमत्ता चलच्चित्र-निर्माणस्य प्रक्रियाम् उन्नेतुं शक्नोति, तथापि सा मानवीय-सृजनात्मकतायाः भावानां संवेदनानां च विकल्पः भवितुं कदापि न शक्नोति।

राष्ट्रपति-केरलम्यात्रा

राष्ट्रपतिः द्रौपदी-मुर्मुः वैज्ञानिक-अनुसन्धानस्य, प्रलेखीकरणस्य, संस्थागत-सहयोगस्य च माध्यमेन भारतस्य पारम्परिक-चिकित्सा-पद्धतीनां सुदृढीकरणाय आह्वानम् अकरोत्। सा अद्य केरलम्-राज्यस्य त्रिशूर-नगरे वैद्यरत्नम्-आयुर्वेद-महाविद्यालयस्य स्वर्ण-जयन्ती-समारोहस्य समापन-सत्रं सम्बोधयन्ती आसीत्। राष्ट्रपतिः केरलम्-राज्यस्य समृद्धम् आयुर्वेदिक-न्यासन रेखांकयन्ती शास्त्रीय-आयुर्वेदिक-ज्ञानस्य संरक्षणाय संवर्धनाय च अष्टवैद्य-परिवाराणां योगदानस्य प्रशंसाम् अकरोत्। सा प्राचीन-ग्रन्थानां, पाण्डुलिपीनां, चिकित्सा-पद्धतीनां, पारम्परिक-प्रथानां च व्यवस्थित-रूपेण प्रलेखीकरणस्य आवश्यकतायाम् विशेषं बलम् अददात्।

छात्रान् सम्बोधयन्ती सा व्यवसायिक-उत्कृष्टतायाः वञ्चितानां सेवायाः च समन्वयस्य परम्परां निर्वोढुं आग्रहम् अकरोत्।

केन्द्रीयविद्युत्-मन्त्री मनोहरलालः

केन्द्रीयविद्युत्-मन्त्रिणा मनोहरलालेन अद्य उक्तं यत् भारते द्रुतगत्या वर्धमानायाः विद्युत्-आवश्यकतायाः पूर्तिः सफलतया क्रियते इति। तेन उक्तं यत् देशः ऊर्जा-क्षेत्रे आत्मनिर्भरतां प्राप्नोति तथा च समीपस्थेभ्यः देशेभ्यः विद्युत्-निर्यातय अतिरिक्त-विद्युत्-शक्तिः अपि प्रापयति। अद्य नवदिल्ल्यां ऊर्जामन्त्रिणां सम्मेलने सम्बोधयन् तेन सूचितं यत् आगामिषु दशैकादशवर्षेषु भारतेन पञ्चशत्-

गीगावाट् मितम् अक्षय-ऊर्जा-क्षमता प्राप्तुं लक्ष्यम् निर्धारितम्। अस्य लक्ष्यस्य प्राप्तये विद्युत्-उत्पादनेन सह राष्ट्रिय-प्रेषण-जालस्य अपि समानुपातेन विस्तारः करणीयः इति।

क्रिकेट्-क्रीडा

पुरुषाणां क्रिकेट्-क्रीडायां क्राइस्टचर्च-नगरे भारत-न्यूजीलैण्डयोः द्वितीयायां टेस्ट्-क्रीडायां न्यूजीलैण्ड्-दलेन प्रथमदिनस्य समाप्तौ पञ्च-क्रीडकाणां हानौ षट्चत्वारिंशदधिक-द्विशतं धावनाङ्काः समर्जिताः।

।। इति वार्ता: ।।